दिनाङ्क :-19.12.2024

प्रात: - 06:55

एकं राष्ट्रमेकं निर्वाचनम्

प्रशासनमद्य एकं राष्ट्रम् एकं निर्वाचनमिति निर्वाचनेन सम्बद्धानि विधेयकानि संयुक्त-संसदीय-समितये प्रेषयिष्यति। यस्मिन् एकत्रिंशत्-सांसदा: सम्मिलिता: भविष्यन्ति। अपरत्र अस्यां समित्यां एकविंशति-लोकसभाया: सदस्या: दश राज्यसभासदस्या: च सम्मिलिता: सन्तीति। सांसदेषु भाजपेतिदलस्य नेतार: पी.पी.चौधरी-अनुरागसिंहठाकुर-पुरूषोत्तमभाई रूपाला इत्येते अपि च काङ्ग्रेसदलस्य प्रियङ्कागांधी-मनीष तिवारी टीएम् सी इत्सस्य दलस्य कल्याणबनर्जी एनसीपी इति दलस्य सुप्रियासुले: च सम्मिलिता:।

अमितशाह:

केन्द्रीयगृहमन्त्री अमितशाह: अद्य नवदिल्ल्याम् एकस्य उच्चस्तरीयसुरक्षोपवेशनस्य अध्यक्षतां करिष्यति। उपवेशनमिदं प्रामुख्यत्वेन सुरक्षाविषयेषु केन्द्रितं भविष्यति यस्मिन् जम्मूकश्मीरस्य स्थितिम् आलक्ष्य चर्चा चर्चिष्यते। एतस्मिन् सम्मेलने जम्मूकश्मीरस्य उपराज्यपाल: मनोजसिन्हा इत्येष: राष्ट्रिय-सुरक्षापरामर्शद: अजीतडोभाल: केन्द्रीय-गृहसचिव: गोविन्दमोहन: गुप्तचरविभागस्य निदेशक: तपनडेका: थलसेनाध्यक्ष: जनरल-उपेन्द्रद्विवेदी अन्ये च वरिष्ठाधिकारिण: अपि भागग्रहणाय आयान्ति। जूनमासे आयोजितस्य जम्मूकश्मीरस्य सुरक्षास्थितिं समादाय इदं पञ्चमासान्तरम् अन्यं सम्मेलनं विद्यते।

राष्ट्रियमान्वेषणाभिकरणं

राष्ट्रियान्वेषणाभिकरणेन अन्ताराज्यीय-शस्त्र-दुर्व्यापारप्रकरणे चतुर्षु राज्येषु बहुविधस्थलेषु अन्वेषणम् कृतम्।

ह्य: बिहार द्वादशस्थानेषु नागालैण्डस्य त्रिषु स्थानेषु हरियाणा: एकस्मिन् स्थाने जम्मूकश्मीरस्य च एकस्मिन् स्थाने अन्वेषणाभियानमिदं प्रचालितम्। अन्वेषणप्रक्रियावधौ अनेन अभिकरणेन अनेकानि निषिद्धानि शस्त्राणि अधिगतानि। अन्यानि आपराधिकपत्राणि अतिरिच्य एकं कारयानं चतुर्णवति-सहस्राधिक-त्रयोदशलक्षं यावत् धनराशय: च गृहीता:। अत्रावधौ अभिकरणेन सूचितं यत् येषाम् आशङ्कितानां परिसराणाम् अन्वेषणं जातम् ते पूर्वं निगडिता: अभवन् अपि च एकस्मिन् प्रकरणे आरोपपत्र-प्रदातृभि: चतुर्भि: आरोपिभि: सम्बद्धा: वर्तन्ते इति।

<u>प्रधानमन्त्री-साहायताराशि:</u>

प्रधानमन्त्री नरेन्द्रमोदी मुम्बय्यां जातायां नौकायानदुर्घटनायां मृत्युं प्राप्तानां जनानां परिवारान् प्रति संवेदनां प्रकटितवान्। प्रधानमन्त्री व्रणितेभ्य: प्रार्थनां कृतवान्। उक्तवान् च यत् मृतकानां प्रत्येकस्मै परिवाराय प्रधानमन्त्रि-राष्ट्रिय-साहाय्यकोषात् द्विलक्षरूप्यकाणि प्रदास्यते अपरत्र व्रणितेभ्य: पञ्चाशत्सहस्र रूप्यकाणि प्रदास्यते।

<u>निर्वाचनआयोगः-दिल्ली निर्वाचनम्</u>

निर्वाचनायोगेन ह्य: आगामिन: वर्षस्य आरम्भे दिल्लीविधानसभानिर्वाचनस्य सज्जतायाः विषये उपवेशनं कृतम्। आयोगेन दिल्लीमुख्यनिर्वाचनपदाधिकारिभिः आरक्षिप्रशासनाधिकारिभिः सह संवादो विहितः। सप्ततिसदस्यात्मिकायाः दिल्लीविधानसभायाः कार्यकालम् आगामिवर्षस्य फरवरीमासस्य त्रयोविंशतिः दिनाङ्के समाप्तिं याति। निर्वाचनस्य घोषणायाः पूर्वमेव शासनारूढम् आपदलं सर्वेषां विधानसभासनानां कृते प्रत्याशिनां नामानि प्रकाशितवत्, काङ्ग्रेस दलेन निर्वाचनाय एकविंशतिः प्रत्याशिनां नामानि अत्र घोषितानि। भाजपादलेन अधुनापि स्व- प्रत्याशिनां नामानि न घोषितानि।

## क्रिकेटिति

विंशति प्रति विंशति-अन्ताराष्ट्रिय-क्रिकेट-प्रतिस्पर्धायाः तृतीया अन्तिमा च स्पर्धाद्य नवीमुम्बयाः डी.वाई.पाटिल-क्रीडाङ्गणे भारत-वेस्टइण्डीजदलयोः मध्ये भविष्यति। श्रृङ्खलेयं एकम् एकम् इत्यङ्केन समाना एवास्ति।

।।इति वार्ताः।।